तात्पर्यमिति गम्यत इति संबंधः इति पदपरामृष्टमर्थमाह यस्मिन्नर्थ इति सर्वशाखाप्रत्ययत्वमादिशब्दार्थः उपक्रमोपसंहारादि
न तात्पर्यज्ञापकं किं तु प्रमेयस्य कार्यत्वं तत्तच्छ्रुतं निष्प्रपञ्चब्रह्मणोऽप्यभावप्रमित्याशंक्याह न चेति तत्रापि कार्यनिष्ठतयैव तात्पर्यमित्याशंक्य
किं ज्ञातं तात्पर्यं प्रमितिजनकमुताज्ञातमिति विकल्प्याद्यं प्रत्याह साध्यस्येति प्रमितेः सा तत्प्रमितिजनकरूपता त्पर्यप्रमितिः तत्प्रति ध्ये १
पत्तेश्च तद्रूपे ताद्रूप्यासाध्यार्थप्रमितिरितीतरेतराश्रयत्वमित्यर्थः द्वितीयमुत्थापयति साध्य इति अज्ञाततात्पर्येऽपि तादृशसाध्य
प्रमित्यंगीकारे तात्पर्यावधारणं वृथा स्यादित्याशंक्याह प्रतिबंधेति विपर्यस्तं त्वेत्यादेः स्वार्थे तात्पर्यशून्याद्धि परोक्षज्ञानप्रमित्य शु
नुत्पत्तिदर्शनात् सर्वत्रापि प्रमित्यनुत्पत्तिशंका स्यात् तन्निराशार्थं तात्पर्यावधिगमोऽपेक्षित इत्यर्थः अज्ञायमानतात्पर्यवदृष्टप्र
मितिजनकत्वं तात्पर्यज्ञानं च प्रतिबंधकनिवर्तकमित्यंगीकृत्य प्रमेयसाध्यत्वं तात्पर्यज्ञापकमित्येतदयुक्तमित्याह तथापी
ति आर्तिर्लिप्यवाग्वर्ति अस्य प्रतिपत्ति निर्णयवाग्वत्यर्थः अजाक्षीरेण जुहोतीत्युपक्रमविरोधादार्तिर्लिप्यवाग्वाजुहुयादि
त्यादेर्न स्वार्थे तात्पर्यं किं त्वर्थवादत्वमित्यर्थः विवक्षासाध्यत्वयोस्तात्पर्यलिंगत्वनिरसनफलमाह तस्मादिति तस्मादु
क्तान्येव तात्पर्ये लिंगानि तानि दर्शयन् तयोजनात्तात्पर्यलिंगानि स्पष्टयति तत्याहीति सदेव सोम्येदमग्र आसीदेकमेवा
द्वितीयमित्युपक्रमः ऐतदात्म्यमित्यादिरुपसंहारः अभ्यासलक्षणं तात्पर्यलिंगमाह तथेति अनधिगतार्थगंतृत्वलक्ष

नवा २
णो लिंगांतरमाह श्रवणमननेति ब्रह्मप्रतिपादने फलोपलंभादपि तत्र तात्पर्यमित्याह आचार्यवानिति आचार्योपदिष्टशब्दजनि
८ तत्वदी तज्ञानमनननिदिध्यासनाभ्यां असंभावनादिप्रतिबंधनिवृत्तौ ब्रह्मप्रत्यक्षेण यः साक्षात्कुरुते तस्य तावानेव विदेहकैवल्ये विलंबः
यावन्प्रारब्धकर्मणोपभोगेनापरिसमाप्तिरित्युक्तस्यार्थः ब्रह्मणोऽप्रतिपाद्यत्वे अनेन जीवेनेत्याद्यर्थवादोपाद्यानेन स्यादिति च
१४ त ४ तस्मात्प्रतिपाद्यमित्याह अनेनेति अनेन प्रत्यक्षेण प्राणधारणेनात्मना तेजोबन्नलक्षणा देवताः अनुप्रविश्य नामरूपे व्याकर
वाणीत्यर्थः उपपत्तितोऽप्येकं ब्रह्म प्रतिपाद्यमित्याह मृत्स्नाहेति यथा मृदि ज्ञातायां तन्मयं शरावादि प्रतीयते यथा वा लोहस्वरू
त ६ पे ज्ञाते तन्मयस्य सूच्यादेर्ज्ञानं तथा हि कारणब्रह्मज्ञानेन तत्कार्यमपि ज्ञातं स्यादित्यर्थः तत्कस्मादिति चेत् ब्रह्मव्यतिरेकेण कार्यस्य
भावात् एतज्ज्ञानेनैतद्ज्ञानमुचितमित्यर्थः पर्यासत्वं हि वस्तुनस्[illegible]स्कारस्य बंधः इतरस्य मुक्तता तद्दसत्वं जगतः स्वरूपमन्यथा
त ८ नस्य बंधः इतरस्य तु मुक्तताऽपि परस्युक्तस्यार्थः स्वपितिनामनिर्वचनेनैतिसता सोम्य तदा संपन्नो भवति स्वमपीतो भवतीत्यादिना
जायस्व म्रियस्वोपभोगोपस्थापककर्माभावे स्वरूपे व्यवतिष्ठते इत्यर्थः तज्जत्वात्तल्लत्वात्तदनत्वाच्च ब्रह्मव्यतिरेकेण जगतो ऽभा
वः तत्सृष्ट्वा तदेवानुप्राविशदित्याह सृष्टीति सर्वशाखाप्रत्ययत्वं दर्शयितुं शाखांतरीयतात्पर्यलिंगमाह तथाहि तैत्तिरीयक इति सृष्टि
व्यादिभूतत्रयं सत् भूतद्वयं त्यत् तत्तावत्प्रत्ययेवेदं सत् नास्ति प्रत्यग्येवेदं यदिदं किं चानंत ब्रह्मात्मानंस्वरूपं मायया जगदाकारेणाप राम
स्व २

रिणामयामासस्व यमिति निमित्तांतरनैरपेक्ष्यमाह कामं तत इति कामाः स्रष्टिकृतयइतियतोवेत्याद्याइत्यर्थः। उपपत्तिं
प्यकं ब्रह्मेत्याह तथेति अन्नमयप्राणमयमनोमयविज्ञानमयआनंदमयाः पंचकोशाशब्दार्थःकोह्येवान्यात्कः प्राण्याद्य
देषआकाशआनंदो नस्यादित्यादिनाप्राणनादिव्यापारहेतुभूतंब्रह्मा सीतिनिश्चीयतइत्यर्थः। तथाचसंग्रहश्लोकः उपक्र
मोपसंहारावभ्यासोपूर्वताफलं। अर्थवादोपपत्तीचलिंगंतात्पर्यनिर्णयइतितत्रतात्पर्यरणेतिटीकार्थमुपसंहरत्येवमितिपद
नामितिसामान्येनतात्पर्यमभिधायप्रतिपदमर्थमाहतत्रेति शोमादिगादिशब्दार्थः अर्थविलक्षणमितिक्रियावाक्यार्थास
त्यादिवाक्यार्थस्यवैलक्षण्यंदर्शयतीत्यर्थःक्रियाकारकसंसर्गस्पत्तेदव्याप्तत्वादन्यचतदभावान्नैवमित्याक्षेपमव्यतिरेकेति
उदरमंतरंकुरुतइत्यन्यतेदमात्रस्यप्रतिबोधावृतातस्यचावाक्यार्थइत्याहनेत्या हेतिनियोगसाध्यालाबान्नतदा का
र्येत्याहनेत्याहेति निर्धर्मकात्वप्रकृतिविरोधान्न लिंगादेस्तत्रान्वयइत्याहनेत्याहेतिकारणत्व ध र्मिणोज्ञानादिगुणप्रति
पादनात्कथमुक्तसमन्वयसिद्धिरित्याशंक्याहजगदितितत्रवेदेज्ञानानंदशब्दौजगत्कारणस्यसामान्यानुवादिनानंदविशे
षंगमयतइत्यन्वयःकारणत्वस्यलोकप्रसिद्धत्वान्नश्रुतिप्रतिपाद्यत्वेज्ञानत्वमानंदनिष्ठंज्ञाननिष्ठत्वात्सत्तावदित्यनुमाना

पदानामित्यस्य व्यवहितान्वयेन योयति ४

+ दुःखजाड्यविरोधित्वमित्यर्थः। एकादित्रांशैरकरस्य प्रतिपादने पर्यायत्वं स्यादित्याशंक्य वाच्यभेदान्नेत्याहैकेतिमि १

८ स्व.टी. ज्ञानत्वकेनानंदत्वस्य चैतदप्रतिपन्नेनानंदस्य च ब्रह्मस्वरूपत्वात्तत्समन्वयविरोध इत्यर्थः। आनंदविशेषमितिर्थ्यश चोपक्षितवासीदैतत्र
द्वैतं न च विजातीयो भेदः कथ्यते लक्षणायेति वाच्यवक्तव्यासेनेत्यर्थः। कथं तर्हि सर्वज्ञादिशब्दा इत्याशंक्याह सर्वज्ञ इति प्रपंचोपाधि
तयेति प्रपंचापेक्षयेत्यर्थः। गंगापदलक्षिते तीरस्य गंगात्ववदात्मादिपदलक्षिते ब्रह्मणात्मादिरूपं स्यादित्याशंक्याहायमिति मुख्य
लक्षणात्यागमिति जहदजहल्लक्षणयेत्यर्थः। गंगाशब्दस्य तीरे जहल्लक्षणायां वृत्तेः आत्मादिशब्दानां च जहदजहल्लक्षणायेति विषम्य
१५ मित्यर्थः। मुख्यलक्षणोपाधिभिरित्ययमर्थः। मुख्यवृत्त्यावर्त्तत एकादिशब्दास्तु जहल्लक्षणया तत्त्वमस्यादयो जहदजहल्लक्षणया
सर्वज्ञादयस्तूपाधित इत्यर्थः। भेदाद्यभावाभिधानद्वारेण ब्रह्मण एकादिशब्दानां वृत्तिपक्षे भेदादेर्व्यावृत्तिस्वसद्भावादद्वैतविहति
माशंक्याह नचेति निर्गुणोयमित्यादिवाक्यस्थपदानां उक्तेर्थेनुगमाभावान्नोदाहरणमनुपपन्नमित्याशंक्य तात्पर्यमाहानेकेषा
मिति लक्षणार्थानुगमात्तावेपि अखंडार्थानुगमादुदाहरणत्वमुचितमित्यर्थः। एकेनोदाहरणेन विवक्षितसिद्धेः किमुदाहरणांतरेण
त्याशंक्य तत्प्रयोजनं दर्शयितुं वाक्यवृत्तिं हि विध्यमाह तत्रेति तत्र वेदांतेष्वित्यर्थः। सोयमित्यादिवाक्यमखंडार्थनिष्ठं अकार्यकारणद्रव्यमा
त्रवृत्तित्वे [illegible] सति समानाधिकरणत्वात्सोयं देवदत्त इत्यादिवाक्यवदित्यक्तेमाध्यविकलो हि दृष्टांत इत्याशंक्याह तत्रेति।
तत्र लोका इत्यर्थः। मूलभूतप्रमाणात्तावाक्यसोयमित्यादेस्तत्राप्रामाण्यमित्याशंक्य तस्मूलत्वमाह तथाहीति प्रत्यभिज्ञायाश्च राम १५

+१ मुख्यवृत्त्यालक्षणयावत्योपाधिनावेतित्रिविभागो द्रष्टव्यः। ज्ञानानंदत्वाद्वैतत्वं तत्वं शापरित्यागान्नेत्य

पि विशिष्टविषयत्वात्तन्मूलवाक्यस्यापि तद्विषयत्वमित्याशंक्य प्रत्यभिज्ञायां न विशिष्टैक्यमालंबनं इति वक्तुं विशेषणैक्याता
वंतावदाह तत्रेति तत्फलमाहानाएवेति दतद्देशकालविशिष्टयोरैक्यासंभवश्चेत्तर्हि तद्देशकालोपलक्षितस्य तद्देशकालवि
शिष्टैक्यं प्रत्यभिज्ञागोचर इति शंकते किंचित्विति उपलक्षितविशिष्टयोरैक्ये विशिष्टस्वरूपमन्यत्रापि स्यात्तथाह स्पष्टत इत्याशये
नाह सोयमिति प्रत्यभिज्ञाया अखंडार्थत्वमभिधाय तन्मूलवाक्यमपि तथेत्याह प्रत्यभिज्ञानमिति स्वार्थैकदेश इति स्वा
र्थस्यैकदेशस्तदेतद्देशादिवैशिष्ट्यलक्षणः तस्य परित्यागेनेत्यर्थः एकदेशलक्षणायेति देवदत्तस्वरूपलक्षणयेत्यर्थ
ः प्रकारांतरेण सोयमित्यादेरखंडार्थत्वमाशंक्य निराकरोति एकैकस्मात्पदाद्व्यथमावित्तैकपदात्प्रतीयमानं यदेकं तदेव वा
क्यप्रमेयं अन्यत्राघटत्वाद् सोयमिति पदार्थयोर्यत्प्रत्येकमेकं एकैकपदसिद्धं न तत्स्ववाक्यप्रमेयमत्रान्यानधिगतार्थैस्तु त्रै
र्थेनानुवादकत्वप्रसक्तेरित्यर्थः द्वितीयं दूषयति न चैवं तद्देशादिविशिष्टयोरितरेतरैक्यं वाक्यप्रमेयमिति शंक्यं कुत इ
त्युत्तिरस्य मानत्वादिति प्रतिबंधासमाधत्ते प्रत्यभिज्ञायामिति किमभिज्ञायामवगतैक्यदेवैकं तदेव प्रत्यभिज्ञाप्रत्यक्षेणावेष्य
ते तत्प्रत्ययवत्तदेव वैयर्थ्यपातादिति प्रत्यभिज्ञेत्यपि द्वितीयं दूषयति न चोत्तरयोरिति प्रमेयांतरमाशंकते एकस्येति प्रत्यभिज्ञाया
मन्वयमतस्यैव प्रत्यभिज्ञाप्रमेयत्वं एकस्य कालद्वयसंबंधेश्चानालिंगाया सिद्धेरिति कालद्वयसंबंधिपदार्थस्यैतदैक्यस्य

बाधितत्वाप्रमेयत्वं वक्तव्यं न च तदुक्तयं संलवत्तीत्याह कालत्रयेति विकल्पासहत्वान्नैतदिति शंकते स्यादेतदिति किं प्रत्यतिज्ञाषत्य
८ तत्वदी० हास्य प्रामाण्यमेव निरस्तं कीर्तितं अथ वा प्रत्यक्षादिप्रमाणपात्रसाधारणं प्रमेयं जिज्ञासितेनाघत्लावसंगछत इत्याहहृदगीकत्वेति द्वि
तीयं दूषयति तत्रेति कथं तर्हि तत्प्रामाण्यं तत्राह पदार्थेति फलसमर्थनफलमाहात इति साम्येनोत्तरमाहेवेतही तिद्वषंशोक्तम
र्थेराद्रीति केसमपियतितत्थेति तत्वमसिवाक्यस्यापि प्रामाण्यमुपपद्यत इति संबंधः प्रत्यक्ब्रह्मणोर्भेदहत्वान्नतदैक्यपरत्वं वा
१६ क्यस्येत्याशंक्याह त्वंपदेनेति एकदेशपरित्यागेन लक्ष्मा माराणाइहृस्वरूपस्य ब्रह्मस्वरूपैक्य इति संबंधः एकदेशपरित्यागेनेति क
र्ह त्याघंशपरित्यागेनेति यावत् ब्रह्मणः परोक्षत्वात्कथं तद्भेद इत्याशंक्याह परोक्षेति विरुद्धांशपरित्यागाभावेन त्वंपद
सामानाधिकरण्यानुपपत्तिरित्यर्थः तर्हि तन्मात्रस्य पदात्त्याघ्रतिपन्नत्वात्किं नाक्येनेत्यत्राह जीवब्रह्मेति तत्त्वंपदार्थयो
! परस्परैक्यस्य पदमात्रादप्रतिपत्तेः सद्बोधकत्वेन वाक्यमर्थवदिति शंकते ननु पदार्थयोरिति किं पदार्थयोः क्रियानपित्ते
दो विवक्षितः आहोस्वित्तात्पर्यतेदः नाद्य इत्याह नैतत्स्मारमिति प्रतिपादनइत्यन्त्रस्फुरत्पा क्रियमाणा इति शेषः तथास्यादित्यै
क्यप्रमेयं स्यादिति यावत् घत्यक्ब्रह्मणोरतिरेके प्रमाणान्तराभावात्तथैव पक्षः साधुरिति काक्वा सूच्यते द्वितीयं कालुशद्दे
नव्यावर्त्यते कथं तर्हि प्रामाण्यमिति तत्राह निवर्तकत्वादिति अज्ञाननिवर्तकत्वादेव प्रामाण्यं सिद्धमित्यर्थः नीकनु राम
+ प्रसारूपदेति। नचैवं सत्यपसिद्धांतोपिस्यात् तदुक्तमिति। अर्थगतप्रमितिजननेन प्रामाण्यवां २ १६

उताभिन्ने २ त्याद्यंशे २
श्च १
सलमित्यादिसंसर्गबोधकत्वेनशाब्दमानं।। सोयमित्याद्युक्तं उद्बोधकत्वेनतत्तत्त्वमस्यादिवाक्यं पञ्चमवलंबतां इति तत्रा हेहत्वि
न्निविधांतरे।।एवं उक्त्वा वाक्यार्थमाक्षिपति नंनुतत्त्वमितिवाक्ये पदलक्षितस्वरूपेकिंतिन्नंइतिविकल्प्याहतत्त्वंपदार्थाप्यामि न्निइतीयेहतत्र
तिनचेदितिपदार्थवावाक्यार्थयोरैक्येवाक्यंव्यर्थंस्यात् लक्षितस्वरूपेआरोपाधिकभेदस्याप्यत्तावादित्यर्थं लक्षितस्वरूपेऽप्यत्र
मभिन्नेनचपदार्थवावाक्यार्थयोःसांकर्यप्रसंगः इष्टापत्तेरित्याह सत्यमितितर्हिपदद्वयवैयर्थ्यंतत्राह सत्त्वेतिलक्षणा।। निमित्तमा
ह मुख्येतिं त्वंपदस्यवाच्यार्थपरित्यागेनलक्षणवत्त्वंतत्पदसामानाधिकरण्येघटतेतथात्वंपदस्यापिवाच्यांशपरित्या
गेन चिल्लक्षकत्वेत्वंपदसामानाधिकरण्यइतिनपदद्वयवैयर्थ्यमित्यर्थः अखंड वाक्यार्थसमर्थमुपसंहरतितस्मादि इवा १
तिनिरस्तमपिपक्षंदूषणांतरातिधित्सयापुनरुत्थापयतिअन्येकमुख्येनो कमुपपाद्यत्यन्यथेतिश्र्वतितोपिभेद केचिदितिव्य
सिद्धिरित्यर्थहय आत्मनीतिनेम शब्दे नबुद्धिरभिधीयतइतिशंक्ययोविज्ञानेतिष्ठन्नित्यादिनाबुद्धेर्निर्दिष्टत्वादित्यर्थः तिरे
विकल्प्यासहत्वान्नेतन्मतंसाधित्याहनैतदितिमुख्यवस्थाद्यौभेदांशस्यनिष्टन्निरूनआद्येपिकिंज्ञानेनोतकर्मणा।।
च २ ज्ञाननिवर्त्यत्वेपिविवेनीयंकिंवाकर्माहत्ज्ञानंउत्तास्यामिद्धि कुअथावात्तृतीयज्ञानमितिविकल्प्याद्यपृथमहि
लीयोदूषयति।नो दासेदेतिघटज्ञानस्यघटनिष्ठत्वकत्वदर्शनादित्यर्थः तृतीयमुद्भावयतिहतीयेतिशास्त्रज्ञात्यानो
स २

मज्ञानितज्ज्ञानापेक्षयात्तृतीयज्ञानेनेत्यर्थः। तस्यापि भेदादविषयत्वान्न ते निवर्तकत्वमित्याशंक्याह भेदमात्रेति तृतीयत्वं बाधाधायकत्वेत्यत्रे
द२ देतितयोर्भेदाभेदगोचरत्वादस्य च भेदमात्रगोचरत्वात्तृतीयत्वं युक्तमित्यर्थः। अभेदमात्रविषयत्वमसिद्धमित्याह नन्वयथेति तत्त्वमहेतुमा
हान्यथेति शाब्दं ज्ञानं भेदाभेदगोचरं तदत्यासिद्धं त्वभेदमात्रविषयं इत्यंगीकारे शाब्दज्ञानवैफल्यं स्याज्ज्ञप्ते सिद्धगोचरयोर्जन्य
जनकताऽनुपपत्तेरित्यर्थः। इतोऽपि न ज्ञानं निवर्त्यं भेद इत्याह ज्ञाननिवर्त्यत्वेनेति विकल्प्यांतरमुत्थापयति ज्ञानेनेति भेदस्य क
र्मनिवर्त्यत्वे ज्ञाननैरर्थक्यमपि न शंक्यं अज्ञाननिवर्तकत्वेनार्थवत्त्वसंभवादित्याशयेनोक्तं ज्ञानेनेति कृतिविरोधेनोत्तरयति न
२७ ब्रह्मवेदेति ब्रह्मैव भवतीत्येवकारेणाऽतिरीयमानस्य भेदनिरासस्य ज्ञानमात्रप्रयोज्यत्वं श्रुतं तद्विरुद्धं कर्मनिवर्त्यत्वाभिधानमि
त्यर्थः। कारकाभिधेयभेदनिरासस्येति पाठे ब्रह्मवेदेत्यत्र द्वितीयाविभक्तिलट्प्रत्ययाभ्यामभिधेयो यः कर्मकर्तृकारकरूप
ऋ४ भेदः तन्निरासस्य ज्ञानमात्रप्रयुक्तत्वादित्यर्थः। यत्र कब्रह्मणो भेदाभेदौ अंगीकृत्य न भेदांशनिवृत्तिरित्युक्तं संप्रतिप
न्नएवायमसंगत इत्याह येनेति भेदकाकारस्याभेदकारादितरः उत नेतरः। आद्ये भेदकाकारनिवृत्त्या भेदनिवृत्तिसंभवेऽभेद ये२
स्यापि निवृत्तिः स्यादितरथा भेदेऽपि न निवर्तेतेत्यर्थः। द्वितीयमुत्थापयत्याकारांतरेणेति भेदकमाकारांतरं किं तात्त्विकमु राम
ताताविकं उभयथाप्यसंगतवद्इत्याह नदेति निरवयवद्रव्यस्येति विशेषणं नाकारांतराभावमत्तिद यौ तावपि तस्यतात्वि
१७

क्तत्वान्ननिवृत्तिरित्याह निवर्त्तयितुंशक्य। तद्वत्तिं अतात्विकत्वेप्यज्ञानमूलत्वात्कर्मनिवर्त्यत्वमसंतत्वीत्याह कर्मणेतिभा॥

न्नर्हिनेदनिवृत्तिरिति विकल्पांतरमाशंक्याहेतिभि [illegible] नातिञ्चइतितत्रश्चनसंसारावस्थातोमुक्तेर्विशेषइतिद्रष्टव्यंअसंत

भेदेनत्वमस्मादिशास्त्रस्यानुपपत्तिः अत्यंताभेदेत्वयुआसनितिष्ठन्नित्यादेस्तत्तथाचभेदाभेदौशास्त्रतएवसिद्धौकथंनिह्नूयेतेत

त्राहनचेतिसत्वादिरूपेणाभेदस्यविशेषरूपेणाभेदस्यचलोकप्रसिद्धत्वान्नदृष्टांतेनब्रह्मण्यपि तदाभेदयोः सिद्धिः नशा

स्त्रप्रत्याघत्वमित्यर्थः किंचलब्धचैतन्यजीवोपिकीदृशइतिविवेचनीयं किंतेनदृकाकारविशिष्टः उत्ततत्वपलक्षितः नाद्यइत्या

हयदिचेतिनचजीवनाशप्रसंजनमिष्टमित्यपिशंक्यनीयंफलिनोभावेफलाभावप्रसक्तेरित्यर्थः द्वितीयमुत्थाप्यदूष

यतिअथेतिअपसिद्धांतेनयत्त्याहब्रह्येतिदंउपायेतहिशिष्टनिवृत्तावपिचैतन्यस्वरूपस्थितिवद्विशेषश्चेतन्यस्थितेर्मु

क्तुपपत्तिरितिशंकतेअथविशिष्टइतिचिन्मात्रस्यमुक्त्यनुवृत्तिवत्वेतस्यैवबद्धत्वंइतरथाबंधमोक्षयोर्वैयधिकरण्यापात

तेः तत्रस्वास्मन्मतसिद्धिरित्याहनहीतिएकस्मिन्नवस्तुनिसामर्थ्यविकारसंप्रविरुद्धइतिकामुपसंहारव्याजेननिरस्य

तितस्मादितिवाक्यभेदसंभवात्त्वामानाधिकरण्यंयुक्तमित्यर्थः मतांतरमनूद्यदूषयतियेपीति तदतावत्प्रमाणविरोधी अप्रमतानंदमतं २

कशब्दार्थः अतिरेकविशिष्टस्यतदुपलक्षितस्यवाजीवत्वासंभवादतिरेकानिरूपणाच्चैनेनस्थाप्यमित्यर्थः॥ स्क्रतिवि

अतिरे १

८ तत्त्वदी० रूढ्योश्चार्थयपदे इत्याहैकत्वेति। तस्मादस्मदुक्तमेवपरिशिष्यत इत्याह तस्मादिति। प्रकृष्टप्रकाशश्चन्द्र इत्यनेनतत्त्वमस्यादिवाक्यएवो
दाहृतं। तर्हि निर्दिष्टमित्याशंक्य महावाक्यस्याखंडार्थत्वमभिप्रायावांतरवाक्यस्यतदाहेत्याहेदानीमिति। प्रकृष्टादिवाक्यस्य विशि
ष्टबोधकत्वाद्दृष्टांतासंभव इत्याशंक्याह तयोरिति। प्रकृष्टप्रकाशशब्दयोरेकार्थत्वेपर्यायत्वं स्यादित्यत्राहाधमर्थ इति वाच्यते
४५ शृन्यर्थायत्वमित्यर्थः। उक्ताभ्यां पदाभ्यामेकव्यक्तेर्लक्ष्यमाणत्वे पदांतरमनर्थकमित्याशंक्याह तत्र गुणसामान्ययोरिति।
१८ प्रकर्षप्रकाशत्वयोरित्यर्थः। प्रकृष्टशब्दान्न चंद्रप्रातिपदिकार्थसिद्धिः। प्रकृष्टंतम इति प्रकर्षशब्दस्यप्रकृष्टसंतमसे
पि प्रयोगदर्शनान्तथाप्रकाशशब्दादपि न तत्सिद्धिः खद्योतादावपि तत्प्रयोगदर्शनात्तथाचवाच्यपरित्यागेनाप्रकाशाप्रक
र्षविरोधी चंद्रप्रातिपदिकार्थः पदद्वयेन प्रतिपाद्यत इत्यखंडार्थत्वसिद्धिः। इतरथा चंद्रप्रातिपदिकार्थमात्रप्रश्नोत्तरतया
विशिष्टमर्थं बोधयत्ताव कुरनवधेयवक्तृत्वं स्यात्तथा च विमतमखंडार्थं लक्षणावाक्यत्वात्प्रकृष्टप्रकाशश्चंद्र इतिवा
क्यवदिति सिद्धमित्यर्थः। तत्रोक्तहेतोरप्रयोजकमाशंक्यतेनगुणगुणिनिष्ठलक्षणा निर्भेदत्वान्नैवं विशेषोन्वय इत्याह तत्रो
क्तनिर्भेदत्वमेवकुत इति वीक्षायामाह एकमेवेति एकवैवेति एकरूपेणेत्यर्थः। कारणं ब्रह्मणः नानात्वस्य निषेधे ऽन्य राम
त्रस्थित्यसंभवात् निर्भेदत्वमित्यर्थः। उत्तरमितिच्छेदः। ब्रह्मणएतत्पर्यंतरं भेदंघः कुतस्तत्स्यात्तद्वेदिना तत्पदंतवति अथश १८

अं१

धैःस्फु १

आ १ वृत्तांतर्यातिधानमुखेन त्ते दृष्टान्तस्य हेतुत्वउदर्शनार्थः प्रमाणांतरात्तावात्‌ बह्माणि चेदं तानामप्रामाण्ये चेदिति प्रमाणांतरा
नावातिधानमसंगतं इत्याशंक्याहाय मांशय इति मिथ्यात्व मित्यप्रामाण्य मित्यर्थः अबोधलक्षणमप्रामाण्यपक्ष मविक
ल्पाद्यैः गृहीतसंगतिकस्य पुंसः सत्यादिवाक्यश्रवणेऽबाधितार्थप्रमितिदर्शनादबोधकत्वमसंगतं इत्याह तन्नेतावदिति स्पर्थस्य
तिअर्थसंबंधियत्‌ प्रमाणांतरं तत्प्राक्तुदय इत्यर्थः मिथ्यात्व मित्यत्र शब्दस्यैत्यनुषंगः विपक्षे दंडमाहान्यथेति इच्छस्येति नत्वंव दृ
वादेरित्यर्थः नदीतीरफलसद्भावादौ प्रमाणांतरात्तावाद्प्रामाण्य मित्याशंक्याह कथं चिदिति प्रमाणांतरसंवेत्ति न्नोर्थो विषया
पस्यसप्रमाणांतरसंतिन्नार्थः तस्यतावद्यत्वं तस्याततावादित्यर्थः असिद्धो हेतुरिति शंकते भूतार्थेति विमतं प्रमाणांतरसंतिन्ना
भूतार्थेप र्थस्यान्नदीतीरफलसत्तावाक्यवदित्यर्थः अप्रयोजको हेतुरित्याह नेति किंतर्हि मानांतरसंवेत्तदे प्रयोजकमित्यत्राह पौरुषे
येति किमत्र विनिगमनकारणमित्यत्राह भूतार्थेति पौरुषेयवचनत्वमप्रयोजकं व्यभिचारादिति शंकते ऽनुभूतेति पौरुषे
यवचनत्वं तत्र नेति शेषः अस्त्वेवं तर्हि अप्रयोजकमित्याह तर्हीति लोकिकवाक्यस्य स्वार्थप्रवृत्तज्ञानांतरजन्यत्वमेव कथमि
त्याकांक्षायामाह पुरुषेति विवक्षावशोपि वाक्यत्वात्स्वार्थप्रवृत्तज्ञानांतरजन्यत्वं ततश्च मानांतरसंभेदसत्त्वान्न वितित्र
समहतो भूतस्य निश्वसितमेतदित्यादिश्रुतिविरोधात्तवेदस्य प्रमाणांतरसंवेद्यत्वमित्यर्थः अतिप्रसंगलक्षणपक्षबाध

+ वैदिकलिङ्गादिश्रवणादर्थबोधो न स्यादित्यर्थः। वैदिकलिङ्गादीनां प्रमाणांतरगो ४
कर्त्तकपराहतश्चायं हेतुरित्याह किंचेति विधिवाक्यार्थः प्रमाणांतरयोग्यः तुच्छव्यावृत्तत्वात् घटादिवत् तत्र विधिवाक्यस्यापि
८ तत्त्वदी० भूतवाक्यसाम्यमित्यर्थः। इति प्रसंगात् ननु तुच्छव्यावृत्तत्वं न प्रयोजकं अपि त्वविधेयत्वमिति शंकायामाह लौकिकेति।
विपत्तेरं उमाह। योग्यत्वेवेति प्रमाणांतरगृहीतसंबंधग्रहणादर्शनाद्विधीनां च प्रमाणांतरायोग्यत्वान्न तत्र संगतिग्रहणात
थाऽचरकार्यविषयत्वाच्च साफल्यत्वेन च संगतिग्रहणानुपपत्तिः प्रवर्त्तकाकारमात्रे संगतिग्रहणात्तत स्वर्गकामसमभि
१९ व्याहारानुपपत्त्या क्रियाविलक्षणं नियोगं सिद्धिरित्यभिप्रेत्याह ननु कार्ये सेति साम्ये नांतरमाह ब्रह्मापीति। बाधितवि
षयत्वमप्रयोजकत्वं वा हेतोरित्यर्थः। ब्रह्मणि प्रत्यक्षादेरप्रवृत्तावपि प्रमाणांतरमत्र प्रक्रमत इत्याह स्वरूपज्ञानमिति।
प्रमितिः प्रमाणमिति व्युत्पत्त्या स्वरूपज्ञानस्य प्रमाणत्वमुक्तमिति द्रष्टव्यं किमवच्छिन्नं चैतन्यं प्रमाणं इत्यत्राऽनवच्छिन्नं
आद्ये पि किंवृत्ति विषयावच्छिन्नं उत वृत्त्यवच्छिन्नं उत वृत्तिमदवच्छिन्नं नाद्य इत्याह न शब्देति। शब्दजन्यं च तत् ज्ञानं चे
ति शब्दजन्यज्ञानं तस्य विषयः शब्दजन्यज्ञानविषयः तस्मिन्नवच्छिन्नं त्वं चैतन्यं शब्दजन्यज्ञानविषयस्य चैतन्यं तद्रूपत्वेय
ति विग्रहः। अत्र विषयशब्देन ब्रह्मोच्यते चैतन्यस्य तत्स्वरूपत्वं चोपचरितं ग्राह्यः। शिरइतिवत् [illegible] याश्च विषयावच्छिन्नं चैतन्य राम
स्य प्रमाणफलरूपत्वान्न तत्साफल्यत्वं दोषमावहतीत्यर्थः। शब्दजनितवृत्त्यवच्छिन्नं चैतन्यस्य प्रमाण[illegible] १९

न्याद १

लान्नतेन वेदस्य सापेक्षत्वेन यावृत्तिमदवच्छिन्नचैतन्यस्य प्रमात्वकोटावंतर्भावाद प्रमाणत्वं ततोनंतनापि सापेक्षत्वं दृतिकल्पद
यं ब[illegible]हि स्वनिराकृत्या नवच्छिन्नचैतन्यस्य प्रमेयत्वान्नतेनापि सापेक्षत्वमित्याह चैतन्यजा चैतन्यं च ततज्ञानं चेति चैत नेति।२
न्यज्ञानं तेनतसं तिस्त्र अति नद्दत्यर्थः विद्रूपात्म विषयस्य प्रमाणास्यन विस्वरूपमात्रग्रासापेक्षत्व मित्यत्रसांख्यागुरुमतानुसारि
णोपनि दूषणांतरमाह पुरुषांतरेति पुरुषांतरविषयं पुरुषांतरस्यानुमानस्व पंप्रकाश विषयमपि नस्तपेक्षमिति सांख्यप्रति
संवेदनविषयंचानुमान मितिशाभाकरं प्रत्यक्षमिति द्रष्टव्यं द्वितीयकल्पनिराकरणमुपसंहरति तस्मादिति प्रमाणांतरयो
गपविषयत्वान्न सिद्धानुवादकत्वमिति कल्पं निरस्यति नापीति किं प्रमाणांतरयोगपविषयस्य प्रमाणप्रान्तस्यानुवादकत्वमु
नशाब्दस्येति विकल्प्य धं दूषयति स्पर्शेति द्वितीयमुत्थापयति शब्देति तत्रापि वक्तव्यं किं शाब्दमात्रस्यैवस्वभावः उतस्त नाथे
विषयशब्दस्य आद्येति प्रसंगइत्याह विधिवाक्यस्यापीति अनुवादकत्वमिविशेषः तत्रहेतुमाहतस्यापीति विधिसलक्ष्यद्धो ध्येः॥
द्वितीयं प्रत्याह शब्देति मानांतरयोगपे भूते वर्त्तमानस्य शब्दस्यानुवादकत्वं कस्मात् शब्दसिद्धो भिन्नो मानांतरस्यान भिगतवि
एपंक२ षयात्वावाद्यो भिन्ना नुसादित्यर्थः [illegible] नवप्रमाणां
तरस प्रथमप्रवृत्त त्वादनुवादकत्वमित्यपि शंक्यं शब्दावगते वर्तमानपे[illegible]दे स्नुवादकत्वप्रसंगादित्यर्थः बहुलागः प्रमाणां
त्य १

न्तरागोचरत्वे विचिविधुरस्यादिवाक्यस्य प्रामाण्यापात्तस्मान्नान्तरगोचरत्वमेष्टव्यं इत्यत आह तत्त्वचोदयतीति विज्ञायत इत्यत्र प्र
८ तत्त्वदी० माणान्तराधिगत एव शब्दप्रयोग इत्यत्र टीकाकृतोनुपपन्नः चेदानां नानाब्रह्मणप्रामाण्य [redacted] पातादिसाशंक्य दिकल्पपूर्वकम
वतारयति अन्नपृष्टा मइति मानान्तरागोचरे पि कश्चित्संबंधग्रहणसहृष्टत्वोधपी स्फुर्त्तानैवं मसादिवाक्यानामप्रामाण्यमिति घ ३
शंक्यैशा बुले यहीतसंगतिकानां लक्षणया बुद्धिरि प्रत्युत्पपन्ने रितिइष्टव्यो किंमान विशिष्टसंगतिग्रहाणां उक्तार्थमज्ञ इति वि
२१ मर्शानीयं निमर्शेन्व विशिष्टसंगतिग्रहाणां मानान्तरावार्थमात्रे सामर्थ्यग्रहाणां चक्रव्याप्तिस्पत्तिसंधि नौंधि व्य तत्पद्यत इत्यपान्तेषु क ५
माणानावामिद्ध इतिशंकते नत्वप्रमाणान्तरेतिप्रयोगप्रत्ययदर्शनादिति उक्तमर्ह प्रयोगस्य मध्यमवृद्धप्रत्ययस्य च दर्श
नादित्यर्थः व्यभिचारार्थगोचरमानेमानान्तरावाजन्तसंगतिग्रह इत्याह नेत्याहेतिनवलुप्यव हारस्य व्युत्पत्तिमूलत्वात्था
पिकथं मानसंत्तिन्नेर्थसंगतिग्रहा नाव स्तन्नाहायमर्थ इतियद्यपि वक्तुः प्रमाणसंभिन्नेसंगतिग्रहणं पूर्वं पक्षितो विव क्षि
तंतत्थापितस्यस्वरूपमनुक्त्वा न द्वितीयतिकल्प इत्यत्राय इत्यत्योरपिश्रोतृवक्त्रोरित्यर्थः तन्नीयपक्षमनुवदतियमा
णान्तरेतिव कुमानसंभिन्नसंगतिग्रहणस्य चोदितत्वात् श्रोतृज्ञानमेतेद निराकरणमनुपपन्नं ज्ञानान्तरानिमित्तत्वे हेतुंच
नपश्यामः इत्याशंक्याहायमर्थ इति प्रत्यज्ञादिव्यवहार इति प्रत्यज्ञादिपुरः सरत्वनपानादिव्यवहार इत्यर्थः स्तनपानादि राम २१

विशेषज्ञानात्प्रवृत्तेरनुत्पत्तेः कथमर्थमात्रज्ञानादित्युक्तमित्याशंक्य मात्रव्यावर्त्यमाह नन प्रमाणांतरेति फलितमाह तत्स्वेति प्र
योगानुपपत्त्या तन्मूलं ज्ञानमपि कल्पयतं इत्याशंक्य नतस्य प्रवर्त्तकत्वनिश्चयं इत्याह न च कृप्रमाणस्येति विषयविशेषण
तया वक्तृप्रमाणस्यावगम्यत्वेन प्रवृत्तिहेतुत्वं बालो न कल्पयति तिसंबंधः शाब्दप्रथमानयतश्चात्मप्रवर्त्तकत्वानंतस्यैव वि
षयः तद्विशेषणतयेत्य हारार्थं कथनेन प्रश्नप्रतिवचनयोर्वैयधिकरण्यमुक्तं निरस्यत्यल इति प्रमाणं तस्य वक्तृसम्ब
न्धस्येत्यर्थः परिशुद्धशाब्दार्थमाह केवलेति उत्पत्त इत्यत्र इति पदं दृष्टव्यं नदीतीरफलसत्ताविषयं यद्वक्तृज्ञानं तत्कोचरेणश्रात्
नै१ समवायित्वाज्ञाने न प्रवृत्तेर्जनये नेति टीकार्थः ज्ञाते शब्दप्रयोगाद् इति नियमाज्ज्ञानांतरसिद्धार्थबोधकत्वेनेति कथमुक्त
मित्याशंक्य तात्पर्यमाह तन्म इति व्यवहारेणेत्यर्थः ज्ञानांतरसिद्धायमर्थ इत्येवं विधमर्थावबोधं शब्दः प्रतिपत्तुर्जनयतीति
सामर्थ्यावगमकालेव्यक्तिस्तु नानावगतमित्यर्थः उत्तमवृद्धप्रयुक्तशब्दान्मध्यमवृद्धेनार्थमात्रं प्रतिपन्नमित्युक्तं
तदंगीकृत्य संगतिग्रहणविशिष्टविषयमेवेति शंकातेन नुमानादिति अर्थवदेवमानसं न्तेदस्याव्यभिचारित्वात् सामर्थ्यावि
षयत्वमित्यर्थः अव्यतिचारित्वेपि न तस्य शक्तिविषयत्वमित्याह नैतस्याहेति ज्ञानमनवगम्य वस्तु सामर्थ्यावगम इत्युक्तं तन्त्रेह
नुमाहृष्टन्ति तिसामान्येनगृहीतसंगतिकत्वादिशब्दस्य विशेषप्रतिपत्तिर्नस्यादिति शंकतेनन्वर्थमात्र इति सामा

८ नलदी न्यस्य विशेषं विनाऽपर्थिव[illegible]सादाद्विशेषप्रतिपत्तिर्घटतेऽत्र तु मैवं मानसं तेन दस्यार्थविशेषितत्वाभावादित्यभिसंधायाह नेत्याहे
तिमानसं तिन्ने नसंगतिग्रह इत्युक्तं तत्र किं कार्येऽन्तरत्रेति विकल्प्याद्यं भंगाकरोति न त्वेकार्थेति कार्यस्य मानांतरागोचरे
त्वा ज्ञमानसं तिन्ने संगतिग्रहणमित्यर्थः द्वितीयं दूषयति कार्थे पदेशियोग्येतरान्वितस्वार्थस्य सकलपद
शक्तिविषयत्वात्तत्रापि शंकाऽद्वारस्यादित्याह नन्वेषामिति कार्यत्वाकेयपितेषां शब्दानां अर्थमात्रे संबंधग्रहणादिति
२९ योजनात् अर्थमात्रे संबंधग्रहणमित्युक्तमाक्षिपति अत्र केचिदिति न तु शब्दस्य वणादथोपस्थितिदर्शनात्कथमर्थो संस
शिल्विं नत्वाह तथाहीति अंगुल्यग्रादिवाक्यानां प्रमित्यहेतुत्ववदितिरेषामपि तथात्वप्रतीतिस्वात्तासरूपेत्यर्थः नदी
तीरकलसत्तावाक्यादर्थप्रमितिरपि दृष्टेत्याशंक्याह यत्रैवेति गुरुमतानुसारेणासमाधानं तावदाहात्र केचिदिति कि
पुरुषवचोभिः साक्षादर्थानिप्रतीयत उत्पद्यते ऽतोऽर्थादपीति विकल्प्याद्यं अंगीकरोति पुरुषवचसामिति तद्वर्थी
संस्पर्शित्वमिति शंकते किंत्विति वक्तृज्ञानस्यैवार्थी नैव मित्याह वक्तृज्ञानमिति कार्यं तर्हि नास्यर्थसिद्धिस्तत्राह प्रमी
यमाणे तिनिर्विषयज्ञानानुपपत्त्याऽर्थसिद्धिरित्यर्थः अर्थ चेदेव वक्तृज्ञानस्यापि व्यभिचारान्न शब्दस्य तत्परत्वमित्याशं राम
क्य ज्ञानमात्रलक्षणस्य प्रमेयस्य न व्यभिचार इत्याह सर्वत्रेति शब्दः सर्वज्ञानलक्षणां पुंसि न व्यभिचरतीति संबंधज्ञान २९

वेदा॰ त्र॰ मे॰

मेवाहश्रांतिरितिकस्तर्हि पूर्वपक्षाद्विशेषस्तत्राह तस्मादिति पूर्वत्र शब्दस्य प्रमेयभेदेनेत्यत्रात्र त्वैक्ये ज्ञानलक्षणं प्रमेयं
मि त्यत्र इति विभागः अनन्यजन्यस्य सर्वस्य शब्दार्थत्वाद्वक्तृज्ञानस्यान्यथासिद्धत्वान्न शब्दार्थत्वमित्याह तद्युक्तमिति किंच
मानुमानिकत्वं तस्येति शंकायामाह अयमर्थ इति वक्त्रबोधज्ञानपुरःसरं शब्दप्रयुक्ते प्रयोक्तृत्वान्म इत्यनुमाने नैव ज्ञान
सिद्धिरित्यर्थः वक्तृज्ञानस्यानुमेयत्वमंगीकृत्य मध्यमवृद्धस्य ज्ञानव विषयत्वेनैवानुमानमिति शंकते तन्नैवमिति शक्तिवि
षयत्वकल्पकानां वा मेवमित्याह नेत्याहेति अन्वयव्यतिरेकयोस्तर्हि का गतिरित्याशंक्याह शब्दप्रयोगेति पूर्वोक्तस्यैव शंकानि
रस्य तिप्रकरणेति मानसं भेदस्य शक्तिविषयत्वगमकानां वस्तुतः शब्दार्थः वक्तृज्ञानं शब्दप्रमेयं तद्बलादर्थसिद्धिरिति पक्षे वेदा
प्रामाण्यं चेत्याह किं वयदीति किं वक्तृज्ञानमात्रं शब्दप्रमेयं उतार्थ मात्रमिति विकल्पयति किंचेति आद्यं दूषयति नतावदि
तिहितीयं प्रत्याह नागृहीतविशेषणा विशेष्ये बुद्धिरिति न्यायादर्थप्रतिपत्तिर्वक्तृज्ञानस्य स्वकारणांतरानिरूपण
कृद्ध एव कारणमित्याह अर्थस्येति अर्थज्ञानयोरविप्रतिपत्त्याविशेषे कथमर्थस्यैवेत्यवधारणं तत्राह ज्ञानस्येति शब्दरूप
कार्यलिंगेन तत्कारणभूतज्ञानानुमानमिति ज्ञानस्यान्यथासिद्धिरित्यर्थः किंच नस्य पदार्थत्वमुत वाक्यार्थत्वं नाद्य इ किंज्ञा॰
त्याह ज्ञाने निद्वितीयं प्रत्याह न तस्येति विधिमुद्दिश्य त्यादिवाक्यव्यतिरिक्तस्थानेष्विति शेषः विशेषणान्तरार्थ इदस्य इतिश्च
१५ स्वेकारणांतरानिरूपणाद्धेः कारणमित्यर्कं तत्र कारणतावा सिद्ध इति शंकते नन्नु पर

८ तत्वदी० ऽस्तीति आकांक्षासन्निधियोग्यतावंतः प्रायेणासंसृष्टा इति ज्ञानेनेत्यर्थः विकल्पासहत्वान्नेत्याबोधयंस्तं गच्छन्नस्याहतदिदमितिवु
द्धे ज्ञाताज्ञातं किं स्मृतिरुत संशयः आद्ये विपर्ययः अथवा प्रमाणांतरानावतस्मृतिः तद्विषयस्य प्रागनवगतत्वान्नापि संशयः
कोटिद्वयानालंबनात् नापि विपर्ययरूपत्वं बाधानुपलब्धेः अतश्च प्रमितावंतर्भावो वक्तव्यः तत्रापक्षादिकारणत्वे शब्दे चैवयथ्ये शब्द
करणत्वं चास्मन्मते सिद्धिरित्यर्थः वक्तृज्ञानं शब्दः प्रमेयत्वात् दृष्टांतरमाह शब्दानामिति परमते निराकृत्य स्वमतेन गमयति
२२ तस्मादिति शब्द एव संसर्गविमितेः समर्थः वृत्तेर्हि वक्तृज्ञानान्वयव्यतिरेकेत्याशंक्य प्रतिबंधनिरासायेत्यभिप्रेत्याह वक्तृज्ञान
मिति अंगुल्यग्रादिवाक्यानामर्थाः संस्पर्शदर्शनात्कथं शब्दानां संसर्गबोधित्वमिति शंकते तदन्यस्ते हीतिकस्यचिदर्थ
संस्पर्शित्वमात्रेणासकलशब्दानामपि तत्कल्पनेतिप्रसंगः स्यादित्याह तोच्यत इति समभिव्याहृतपदत्रयस्यार्थः उदंरजतिमित्यादि
ज्ञानानां दुष्टकरणजन्यत्वात् यथार्थत्वं तत्र नेरेषांतद्वैपरीत्यान्नैवमित्याह अदुष्टेति तुल्यमुत्तरमित्याह शब्देपीति शब्दानां
त्वस्य संसृष्टप्रमित्यजनकत्वेपि आकांक्षासन्निधियोग्यता सहकृतस्य संसृष्टप्रमितिजनकत्वं युक्तमित्यर्थः तस्मादिति शब्दा
नामर्थसंस्पर्शित्वेन तन्मात्रेसंबंधग्रहणात् नमानांतरसंबंधवत्फलकं युक्तमिति इति शब्दार्थः लौकिकवाक्यस्य भूतार्थ राम
समानां तराधिगतेः प्रामाण्यं सत्त्वेपि न वेदस्य स्वतस्त्वादित्यभिप्रेत्य तत्कृतमपि वेत्यपवदततन्मानपेक्षः शब्द इति कथमुक्तं सं २२

गतिग्रहणाद्यपेक्षादर्शनादित्याशंक्याह किं वा पौरुषेयस्येति प्रमाणं ज्ञानमनपेक्ष्य शब्दोऽर्थं धर्ममिति जनयतीत्यन्वयस्तेन सह का
रिणमप्यनपेक्ष्येत्यर्थः दोषस्य बाधकप्रत्ययस्य कल्प्यत्वादेकमेवाद्वितीयमित्यादेश्च प्रत्यक्षादिपराहतत्वात्तन्न दोषः कल्प्यत इत्या
शंक्याह नन्वत्राप्युक्तमिति अत्र हेतुतावत्तामस्यैव दुष्टकारणजन्यत्वं किं न स्यादित्याशंक्य किं शब्ददोषात्तज्ज्ञानिर्णं प्रमेयदोषाद्वा अथवा न२
प्रमातृदोषादिति विकल्प्याद्यं प्रत्याह शब्दस्येति अपौरुषेयत्वेनानाप्तप्रणीतत्वासंभवादित्यर्थः प्रपंचग्राहि चक्षुरादावपि दो
षादर्शनं तुल्यमित्याशंक्याह हेतुनि चक्षुरादौ काचादिदोषस्य क्वचिद्दृष्टत्वादितरत्र तदंकाऽपौरुषेये तु माहेश्वरे क्वचिदपि दोषान
दृष्ट इत्यर्थः द्वितीयमपवदति इतीति प्रपंचस्याविद्यादोषजन्यत्वान्न ब्रह्मणोऽप्रामाण्यं न तथा ब्रह्मणो दोषजन्यत्वमिति तन्न श
ब्दस्य तद्दोषात् प्रामाण्यमित्यर्थः अथवा प्रत्यक्षादौ न केवलं दोषसंसर्गेनाप्रत्यक्षानिश्चयस्थेऽप्याहे इति सावकाशा
नवकाशयोः सावकाशं दुर्बलमनवकाशं प्रबलमिति न्यायस्तथा च हेतावत्तासम्भस्य सावकाशत्वाद्दौर्बल्यमित्याह स्व दौ४
प्रवदिति अथवा द्वैतप्रत्यक्षस्य दोषजन्यत्वेऽप्रामाण्ये व्यवहारासिद्धिरित्याशंक्याह स्वप्नवदिति शब्दस्यानवकाशत्वे
नप्राबल्यमाह शाब्द इति शाब्दस्य किं व्यावहारिके प्रामाण्यं उत तत्त्वावेदनलक्षणेनाद्यं इत्याह व्यवहारानीते ति द्वितीयं दू
षयति दोषवत्वेऽपि दोषात्मकस्य प्रज्ञानवत् हेतावत्तासम्य व्यवहाराविसंवादः आहो शुक्तिरूप्यज्ञानवद्विसंवाद इति शं

तत्त्वटी॰

तं १ र्थिकांशस्यैवोपमर्द इ २

१ साक्षात्कारोदयपर्यंतप्रवृत्तिः तद्व्यवहारदशायां तद्धि संवादः शंक्य इत्यर्थः १

कार्यं माहन चे ... बुद्ध्यादयं शुक्तिरिति ज्ञानोत्तरकालमिदं रजतमित्यादिज्ञानोत्थितव्यवहारात्तावदद्वैतप्रतिपत्तौ न द्वैतावज्ञासो वित्तिव्यवहा
रःस्यादित्याशंक्याद्वैतसाक्षात्कारोदयात्प्राक् अस्मात्पाहागमेनेतिज्ञातित्वा सिकस्य व्यावहारिकस्य च सत्त्वस्य न बाधः प्रत्यक्ष
विरोधादित्याह व्यवहारे तिष्ठ पंचस्यातात्त्विकत्वेतदंतः प्रातिभासिकाचार्यदिरपि अत्र तात्त्विकत्वाद्वाध्यादिव च प्रमितिजन
कत्वं इत्याशंक्याह द्वितीयेति बाध्यस्य मायत्वात्तत्वप्रमितिहेतुत्वं नास्त्येवेत्यर्थः कदाचिदपि न हि निव्यवहारोपमर्दः उ
त्याशंक्याह तस्मादिति यथा नाहं मनुष्य इत्यपरोक्षप्रत्ययेऽदेहात्मप्रत्ययं बाधते तथेत्यर्थः द्वैतावज्ञासस्यानेककाल
प्रवृत्तत्वात्प्राबल्यमित्याशंक्याह न्यूनेति तिरेरवास्तिविशादि प्रमेय द्वैवशाद्यथाविज्ञानिनो भूतत्तानमप्रमाणं
तथा ब्रह्मज्ञानमपीशं कते ननु प्रमेयेति अत्र च भूतत्वादिः प्रमेयदोष इति द्रष्टव्यं प्रमेयस्य च प्रत्यक्षज्ञानं प्रतिकर्मका
रकत्वात्तद्दोषस्येह तुल्यं युक्तं न तथाप्रकृत इत्याह नेत्याहेति ग्रावाण्यः सर्वं तद् इत्यादौ विरोधात्प्रामाण्ये द्वंद्वं निरा
सार्थं विधिशेषत्वं आहोभूतार्थसंवादापेक्षादर्शनान्निरासार्थं वेति विकल्पार्थः । आद्यं दूषयति विरोध इति अ
न्यतरस्य प्रत्यक्षादेरिति यावत् स्वतः प्रामाण्यादस्य न संवादापेक्षेत्याह नेत्याह तिबोधिल (?) प्रामाण्यमिति पक्षे भूत्वा राम
देरपि प्रामाण्यप्रसंगस्याह नातेति अनधिगतार्थबोधकत्वेन भूतत्वस्याभ्यपि प्रामाण्यापाद्यि विवाक्यानामेव प्रामाण्य २५

मित्युक्तं इत्याशंक्याह नन्विति । अज्ञातार्थबोधकत्वमात्रेण प्रामाण्यं सर्वज्ञोक्तमिति वचनविरुद्धमित्यर्थः । क्रियार्थत्वं वि
नाप्यनयेन्नत्विन प्रामाण्यसिद्धेर्नेतरेतराश्रयत्वमित्याशंक्याह नेतरे ति । भूतवाक्यानामप्रामाण्यपरिहारार्थं क्रियार्थ
त्वेन प्रामाण्यं वक्तव्यं तत्र चेतरेतराश्रयत्वमित्यर्थः । विधिवाक्यप्रामाण्यं विनापि क्रियार्थत्वसि द्धेर्नेतरेतराश्रयत्व
मिति शंकते ननु स्त्रकारेति । प्रामाण्यमेवासिद्धमित्याह नेत्याहेति । क्रियार्थत्वस्याप्रयोजकत्ववत् न्वेतार्थस्याप्यप्रयोज
कत्वमितिचारादित्याशयेन शंकते लक्षणेति । तथैनयत्वमीयतेऽसत्यार्थ इति नियमाद्भविष्यत्वेन रूपतत्त्वस्याकार्यार्थत्व
मित्याह तद्दृहेति । शास्त्रस्य प्रवर्तकनिष्ठत्वात् कार्यबोधितयाप्रामाण्यमिति शंकते न रूपमेवेति । नावबोधादिति नावबो
धमात्रादित्यर्थः । प्रवर्तकनिष्ठत्वमसिद्धमित्याह न कार्यस्येति । कार्यपदस्येत्यर्थः । बोधकत्वेनापि नित्यबोधे ब्रह्मणि
न वेदान्तानां प्रामाण्यमिति शंकते तेन तर्हीति । अनुवादविरोधान्नैवमित्याह नेत्याहेति । नित्यबोधेऽपि तदाकारवृत्त्यु
त्पादनेन वेदान्तानां प्रामाण्यं घटत इत्याशयः । चोदना हि क्रियायाः प्रवर्तकं वचनमित्युक्तिः विधानान्न विधेर्बोधकत्वमात्रे
णाप्रामाण्यमिति शंकते मनुप्रवर्तने इति । प्रवर्तनालक्षणागमकं यस्य प्रामाण्यं स्यात्तत्रथोक्तं व्यभिचारित्वाद्ध्येतल्लक्षणम्
मित्याह नेत्याहेति । प्रवृत्तिविगतेऽपि प्रवृत्तिदर्शनात् प्रवर्तकत्वलक्षणमेव सर्वज्ञप्रामाण्यं नष्ट्वाहेत्यादिरयुक्तं इ

ञा।

८ तत्वटी० त्याशंक्याह ननु तिस्रमेवेतिउपेक्षणीयार्थज्ञानस्यप्रवर्त्तकत्वव्यभिचारादित्यर्थः प्रवृत्तिनिवृत्त्योरभावोकस्मिन्कत्वेन ग्राहं
प्रवृत्तिनिवृत्तीतिवस्तुनिष्पत्तिपन्नेतस्य हि तत्साधनत्वानुरोधेनप्रवृत्त्यादिसंभवइत्यर्थः शब्देपितर्हि तादृशं प्राप्तिमापत्ति
आह शब्देति तत्रितः किमित्यत आह तत इति फलविधुरत्वात् गवा क्वा नाम प्राप्यापेशंकिते ऽपेक्षायोगोन्तरत्वनिरूप
२५ णामसंगतमिवप्रतिभाति त्याशंक्याहो व्यवहार इत्यादिरितिसम्यक्परिहारं दर्शयितुं विकल्पयती दमितिद्वितीयद्
षणा पुरःसरमात्रयभंगीकरोतितंत्रेतिद्विता हि तत्प्राप्तिपरिहारमात्रस्य पुरुषार्थत्वसंतत्वेसाध्यविशेषणं व्यर्थमित्य
र्थः सिद्धे प्राप्तिनातावासाध्यत्वमपि प्रयोजकमिति शंकते ननु सर्व इति पथाश्क्रात मादायाह नेत्याहेति साधनेपि
प्रार्थनादर्शनात्कथमुक्तं पुरुषार्थतावदिति तत्राह फलमेवहीति दृष्टानिष्टप्राप्तिपरिहारयोः पुरुषार्थत्वमंगीकृत्य
साध्यत्वं तु सर्वत्राविशिष्टमिति शंकते ननु साध्येति न च सिद्धस्य साध्यत्वं त्याह तमित्याशंक्य दृष्टादि वस्तुसाध्यत्वसं
तवादि त्यर्थः दृष्टादेसाध्यार्थपरत्वात्तयासाध्यत्वं न स्वरूपेणेत्याशयवानाह नेत्याहेति संप्रतिपरिगृह्याभिसंधिमावि
ष्करोति ननु सर्वइति सिद्धेपि प्रेक्षादर्शनान्नैवमित्याह तत्राहेति प्राप्तप्राप्त्यादेरपि पुरुषार्थत्वात्साधनाधीनत्वं तुल्य
मितिशंकते ननु द्विविधइति स्वभावविशेषान्नैवमित्याह नेत्याहेति प्राप्तप्राप्तिपरिहृतपरिहारयोः क्रियया साध्य राम
२५

त्वात् ज्ञानस्य धर्मत्वं वक्तव्यं नचात्र उपपद्यते ज्ञानस्य तेय निश्चायकत्वा दित्याशयेन शंकते ननु ज्ञानेति किं तत्र मुख्य
स्य साध्यस्यासंभव श्लाघेत उत मुख्यस्याघ स्वं ॥ क्रियत इत्याह तत्राद्ये इति द्वितीये तु नोपपत्तिरित्यभिसंधिनोक्तं
दूपनयइति दृष्टान्तासंप्रतिमाशंकते ननु हस्तगतेति अनुभवविरोधान्नैवमित्याह नेत्याहेति दृष्टान्तानुमर्थं
दार्ष्टान्तिके समर्थयापि तु मा त्विपति ननु ब्रह्मेति ब्रह्मस्वभावत्वान्नतद्भाव स्य क्रियासाध्यत्वं नापि ज्ञानलभ्य
त्वं ज्ञाने सत्यपि पुरुषार्थता दृष्टेः प्रकाशासंगे ब्रह्म ॥ विपर्ययासे स्वबाध्ये त्यर्थः ज्ञत्वसाक्षात्कारस्य प्रभवि
रोक्षित्वान्न द [illegible] र्शनस्य चान्यथा सिद्धे र्वक्ष्यमाणत्वाद् इत्युक्तो संगमस्या
प्यविद्यानिमित्तानर्थसंबंधसंभवाद्ब्रह्म [illegible] ज्ञानात्पुरुषार्थो प्युक्त इत्यभिप्रायेण हा तत्राहेति पुरुषार्थ
पर्यंतं प्रमाणापमित्यर्थः ॥ कृत्यो क्तः पूर्वेत्रं न च तदपीत्याह किंच शाब्दस्येति प्रत्यक्षविनिवर्त्यदेशेनं वा कथं प्रयोगाद्वि
त्यर्थं तं तत्त्वमाप्रमित्याशंक्याह किं प्रवृत्तिनिवृत्त्योः साक्षात्फलत्वं उते प्रिमात्रफलानुगुणत्वं नाद्य इत्याह ल

८ तत्वदी० चेति सर्वविन्मादि शब्दार्थः न चैव हेत्वंतरमाह न चेति इति द्वितीयवयो जनपर्यंतं प्रामाण्यमिति किं गुरुमतानुसारि
णा च प्रवृत्तजन्यत्वमतानुसारिणा नाद्य इत्याह न जन्येति न तु इति वयो जनपर्यंतं प्रामाण्यमिति यद्व्रूर्यस्त्वार्थः द्विती
यमुत्थाप्य पक्षकारणाद्वितपस्त्वराश्रयप्रसक्तेर्नेत्ति दित्याह न प्रत्यवायस्येति तन्निबंधनत्वादिति विधि निबंध
२६ नत्वादित्यर्थः विहितत्वसिद्धौ तदकरणानिमित्तप्रत्यवायनिवृत्तिलक्षणं फलं सिध्यति तस्मिन्सिद्धे तद्धे
तोर्विहितत्वसिद्धिरितीतरेतराश्रयत्वमित्यर्थः उक्तोपि न पुरुषार्थपर्यंतं प्रामाण्यमित्याह न त्वेति ।
प्रत्यवायनिवृत्त्युपसंलक्षितः स्वर्थः अनुष्ठाने बहुतरवित्तव्ययायासादनर्थप्राप्तिः अननुष्ठाने लोकद्वा
हिः करणादनर्थ इत्यप्रामाण्य नित्यादिवाक्यानामित्यर्थः अथवांतरप्रमेयमुपसंहरति अत इति वि
णिकार्थमुपसंहरति तस्मादिति ॥ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यानुभूतिपूज्यपा
दशिष्येण स्वं आनंदमुनिना विरचिते विवरणार्थदीपने समन्वयसूत्रे प्रथमवर्णकं समाप्तं ॥ छ ॥ छ राम
२६